# শ্রীরাধাস্তবনং গণেশকৃতম্

{॥ শ্রীরাধাস্তবনং গণেশকৃতম্ ॥}

শ্রিগণেশ উবাচ ।

তব পূজা জগন্মাতর্লোকশিক্ষাকরী শুভে।

ব্রহ্মস্বরূপা ভবতী কৃষ্ণবক্ষঃস্থলস্থিতা ॥ ১॥

যৎপাদপদ্মমতুতলং ধ্যায়ন্তে তে সুদুর্লভম্ ।

সুরা ব্রহ্মেশশেষাদ্যা মুনীন্দ্রাঃ সনকাদযঃ ॥ ২॥

জিবন্মুক্তাশ্চ ভক্তাশ্চ সিদ্ধেন্দ্রাঃ কপিলাদযঃ ।

তস্য প্রাণাভিদেবি ত্বং প্রিযা প্রানাধিকা পরা ॥ ৩॥

বামাঙ্গনির্মিতা রাধা দক্ষিণাঙ্গশ্চ মাধবঃ ।

মহালক্ষ্মীর্জগন্মাতা তব বামাঙ্গনির্মিতা ॥ ৪॥

বসোঃ সর্বনিবাসস্য প্রসূস্ত্বং পরমেশ্বরী ।

বেদানাং জগতামেব মূলপ্রকৃতিরীশ্বরী ॥ ৫॥

সর্বাঃ প্রকৃতিকা মাতঃ সৃষ্ট্যাং চ ত্বদ্বিভূতযঃ ।

বিশ্বানি কার্যরূপাণি ত্বং চ কারণরূপিণী ॥ ৬॥

*Stotram Digitalized By Sanskritdocuments.org*

প্রলযে ব্রহ্মণঃ পাতে তন্নিমেষো হরেরপি ।

আদৌ রাধাং সমুচ্চার্য পশ্চাত্ কৃষ্ণং পরাৎপরম্ ॥ ৭॥

স এব পণ্ডিতো যোগী গোলোকং যাতি লীলযা ।

ব্যতিক্রমে মহাপী ব্রহ্মহত্যাং লভেদ্ ধ্রুবম্ ॥ ৮॥

জগতাং ভবতী মাতা পরমাত্মা পিতা হরিঃ ।

পিতুরেব গুরুর্মাতা পূজ্যা বন্দ্যা পরৎপরা ॥ ৯॥

ভজতে দেবমন্যং বা কৃষ্ণং বা সর্বকারণম্ ।

পুণ্যক্ষেত্রে মহামূঢো যদি নিন্দা রাধীকাম্ ॥ ১০॥

বংশহানির্ভবেত্তস্য দুঃখশোকমিহৈব চ ।

পচ্যতে নিরতে ঘোরে যাব দ্রদিবাকরৌ ॥ ১১॥

গুরুশ্চ জ্ঞানোদ্গিরণাজ্জ্ঞানং স্যান্মংত্রতংত্রযোঃ ।

স চ মন্ত্রশ্চ তত্তন্ত্রং ভক্তিঃ স্যাদ্ যুবযোর্যতঃ ॥ ১২॥

নিশেব্য মন্ত্রং দেবানাং জীবা জন্মনি জন্মনি ।

ভক্তা ভবন্তি দুর্গাযাঃ পাদপদ্মে সুদুর্লভে ॥ ১৩॥

নিষেব্য মন্ত্রং শম্ভোশ্চ জগতাং কারণস্য চ ।

তদা প্রাপ্নোতি যুবযোঃ পাদপদ্মং সুদুর্লভম্ ॥ ১৪॥

যুবযোঃ পাদপদ্মং চ দুর্লভং প্রাপ্য পুণ্যবান্ ।

ক্ষণার্ধং ষোডশাংশং চ ন হি মুঞ্চতি দৈবতঃ ॥ ১৫॥

ভক্ত্যা চ যুবযোর্মন্ত্রং গৃহীত্বা বৈষ্ণবাদপি ।

স্তবং বা কবচং বাপি কর্মমূলনিকৃন্তনম্ ॥ ১৬॥

যো জপেত্ পরযা ভক্ত্যা পুণ্যক্ষেত্রে চ ভারতে ।

পুরুষাণাং সহস্রং চ স্বাত্মনা সার্ধমুদ্ধরেত্ ॥ ১৭॥

গুরুমভ্যর্চ্য বিধিবদ্ বস্ত্রালংকারচন্দনৈঃ ।

কবচং ধারযেদ্ যো হি বিষ্ণুতুল্যো ভবেদ্ ধ্রুবম্ ॥ ১৮॥

॥ ইতি শ্রী ব্রহ্মবৈবর্তে গণেশকৃতং শ্রীরাধাস্তবনং

সম্পূর্ণম্ ॥

Encoded by Dani l Mohanpersad danielmohanpersad98@msn.com

Please send corrections to sanskrit@cheerful.com

Last updated ত়oday

http://sanskritdocuments.org

Radha Stavanam Lyrics in Bengali PDF
% File name : rAdhAgaNesha.itx
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Daniel Mohanpersad danielmohanpersad98 at msn.com
% Proofread by : Daniel Mohanpersad danielmohanpersad98 at msn.com
% Translated by : -
% Latest update : June 26, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website